# 'कुमारसम्भव' – बालावबोध (अपूर्ण)

**सं. हरिवल्लभ भायाणी**

[ **नोंध :** सद्‌गत भायाणीसाहेबे स्वहस्ते वर्षो अगाऊ लखी राखेल आ अधूरी कृति जेवी छे तेवी ज अत्रे आपवामां आवे छे.

'कुमारसम्भव' महाकाव्य ए महाकवि कालिदासनी उत्तम रचना छे. तेना प्रारम्भना थोडाक श्लोको, ते पर संस्कृत टीका, ते टीकाना आधारे अतिसंक्षिप्त बालावबोध, आटलुं आ सम्पादनमां प्राप्त छे.

कोईक भण्डारनी कोईक २ पानांनी अपूर्ण एवी हस्तप्रतिनी भायाणीजीए करेली आ नकल छे. शरुआत 'अर्हं नमः' थी थाय छे, तेथी जैन मुनिए आ प्रति लखी होवानुं निश्चित थाय छे. पोताना धर्म अने मतनी साथे सम्मत न होय तेवा ग्रन्थकारोना तेवा प्रकारना ग्रन्थो उपर कलम चलाववानी उदारता तेमज हिम्मत जैन मुनिओ सिवाय अन्यत्र जोवा मळती नथी.

आ बालावबोधमां ध्यान आपवायोग्य एक-बे शब्दप्रयोगो–

'किरि' - किल ए अर्थमां वपरायो जणाय छे.

'रहितः' - 'रह्यो' एवा अर्थमां प्रयोजायो छे. जैन संस्कृतनो आ विशिष्ट प्रयोग गणाय.

आ सम्पादन द्वारा ह. भायाणी वती हेमचन्द्राचार्यने स्मरणांजलि आपवानो योग मळे छे, साथे साथे आ मिषे भायाणी साहेबने पण स्मरण करवानी तक सांपडे छे, ते वाते द्विगुण-बेवडो आनन्द छे. **– शी.** ]

★

अर्हं नमः

**अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।**
**पूर्वापरौ तोयनिधी विगाह्य स्थितः पृथिव्या इव मानदण्डः ॥१॥**

इह प्रेक्षापूर्वकारिणां महाकवीनां काव्यारम्भे यथैवाभीष्टदेवतासंस्तवनमभ्युदयनिदानं तथैवोत्कृष्टवस्तुसंकीर्तनमपीति हृदि धृत्वा श्रीकालिदासकविराह ॥

ईणं काव्यारंभि, प्रेक्षा-पूर्व-कारीया अछइँ जि प्राज्ञ महाकवि तीँह किहइँ जीण परि अभीष्ट-देवता-तणउँ संस्तवनु अभ्युदय किहइँ निदानु कारणभूतु, तिम उत्कृष्ट-वस्तु-संकीर्तनू नामोच्चारू अभ्युदय किहइँ निदानु इसउँ इसउँ धरीउ श्रीकालिदासु कवि बोलच्छइ.

उत्तरस्यां दिशि कौबेर्यां ककुभि हिमालयो नाम नगाधिराजोऽस्ति पर्वताधिराजो विद्यते ॥

नगाधिराजु कांइ भणीयइ । न गच्छन्तीति नगा । अधिको राजा अधिराजा । नगानां पर्वतानां मध्येऽधिराजो नगाधिराजः ।

नग भणीयइ पर्वत, तीहँ माहि अधिराजु स्वामीउ जु ।

पर्वतानां स्थावररूपतयैव प्रसिद्धत्वात् । एतां भ्रान्ति निरस्यन्नाह ॥

**किरि** तोयि पर्वत सहजि छइँ स्थावर-रूपिहि जि प्रसिद्धि ॥ तउ ए इसी भ्रांति फेडतउ हूँतउ कवि बोल छइँ ॥

किं-विशिष्टो नगाधिराजः । देवतात्मा देव । देव एव देवता । स्वार्थे देवात्तल् । तल् प्रत्ययः । तकारमात्रः । स्त्रियामादा आ प्रत्ययः । समानः सव० दीर्घः । देवतात्मास्ति तं । देवता आत्मा स्वरूपं यस्य स देवतात्मा । देवस्वरूप इत्यर्थः । यत एव देवतात्मा अत एव अस्य हरेण सह स्वाजन्यम् ।

जउ देवतात्मा तउ महेश्वरि सउँ स्वाजन्यु अनइ-

देवानां मध्ये लब्धयज्ञफलभागत्वात् ।

देव-माहि लब्ध = लाधउ यज्ञ-फल-विभागु ।

यदुक्तं । इहापि च वक्ष्यति । प्रजापतिः कल्पितयज्ञभागं शैलाधिपत्यं स्वयमन्वतिष्ठन् ।

प्रजापति ब्रह्मां देव-माहि यज्ञ-भागु कल्पिउ, अनइ पर्वत-माहि आधिपत्यु दीधउं ।

पुनः किंविशिष्टो नगाधिराजः । स्थितः ऊर्ध्वं **रहितः** । किं कृत्वा । तोयनिधी समुद्रौ विगाह्य अभि [१ क]-व्याप्य । न तु जलनिय्ये (?) । बहवः सन्ति । कौ तोयनिधी ? । भणीइ ।

पूर्वापरौ । पूर्वश्च अपरश्च पूर्वापरौ ।

पूर्व भणीयइ पूर्व-सागर । अपर समुद्र । अपर भणीइ पश्चिम दिशि तणउ समुद्र । ति बेउ विगाही व्यापीउ रहियु अछइ.

कवि-कालिदासेन उत्प्रेक्षते क इव ? पृथिव्या मानदण्ड इव । प्रमाण-यष्टिरिव ।

जाणीयइ किरि पृथ्वी मविवा-तणउ दंड छइ । भणइ हो एहउ दंडु किम घटइ । भणइ

यावन्मेयं तावत्प्रमाणो दण्डः क्रियते । यदा गृहादि अनुमीयते तदा हस्तप्रमाणय (?) लंबया मीयते । तदा हिमवत्सदृशेन दण्डेनेत्यर्थः । न तु (?नु) अहो हिमस्यालयः हिमालयः । तस्य ग्रन्थादौ किं वर्णनम् । नैवं । हि निश्चितं मा लक्ष्मीः तस्या आलये(यो) हिमालयः ।

हि निश्चइं मा भणीयइ लक्ष्मी तहि तणउ आलयु आवासु जु ॥छ॥

**यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोह-दक्षे ।**
**भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् ॥२॥**

इदानीं षोडशभिः श्लोकैः माहिमाव(च?)लवर्णनमेव प्रतुष्टूषुराह ।

हवं एहि सोलिहि श्लोकिहि हिमाचल-तणउं वर्णनु स्तवतु हूंतउ कवि बोलच्छइ ।

सर्वशैलाः सर्वे मेरुमन्दरादयः पर्वताः यं हिमालयं वत्सं परिकल्प्य तर्णकं रचयित्वा धरित्रीं पृथ्वीं रत्नानि दुदुहुः । वच(व?)इ(?) अधुक्षत ।

सविहु शैलि सविहउ पर्वति जु हिमाचलु वत्सु वाछडउ कल्पी(प्यी?)उ धरित्री पृथ्वी रत्न दूधी ।

न केवलं रत्नानि दुदुहुः ।

अनइ

महौषधीश्च । महत्यश्च ओषधयश्च महौषधयस्ता महौषधीः ।

इसउँ नही ज केवलां रत्न दूधी । अनइ महांत अछइ जि शिल्य-विशल्या-अमृतसंजीवनी-व्रणसंरोहिणी-इत्यादिक-ऊषधी दूधी ।

कदा दुदुहिरे । मेरौ पर्वते दोग्धरि स्थिते सति ।

कहीअं दूधी । मेरुपर्वति दुहणाहरि हूंतइ ।

यतः किंविशिष्टे मेरौ । दोहदक्षे । दोहदक्षः दोहे दक्षत्रस्तस्मिन् दोहदक्षे ।

दोहवा तणी ज क्रिया तेह तणइ विषइ दक्षु जु । किंविशिष्टां धरित्रीम्। पृथूपदिष्टां । पृथुना वैण्येन राज्ञा उपदिष्टा पृथूपदिष्टा तां पृथू० ॥ [१ख]

पृथु भणीयइ वैण्यु राजा । तीण उपदिशी-कही ।

ततश्च तन्निदेशेन ऋषि-सुरासुर-पितृनागयक्षराक्षसगन्धर्वपर्वततरुभिः ।

तहि तणा निदेश-तउ ऋषि-सुरासुरि पितृ-नागि यक्ष-राक्षसि गंधर्व-पर्वति तरु-वृक्षि दूधी ।

शैलैश्च श्रूयते दुग्धा पुनर्देवी वसुन्धरा ।

उ(औ)षधीर्वै मूर्तिमती रत्नानि विविधानि च ॥१॥

वत्सस्तु हिमवानासीद्दोग्धा मेरुर्महागिरिः ॥

किंविशिष्टानि रत्नानि । भास्वन्ति । उषधयः किंविशिष्टाः । भास्वन्त्यः । भासो विद्यन्ते येषां तानि भास्वन्ति । भासो विद्यन्ते यासां ताः भास्वत्यः । भास्वन्ति च भास्वत्यश्च भास्वन्ति । नपुंसकैकशेषः ।

नपुंसकलिंग-तणउँ एकशेषु रहिउँ । 'भास्वत्य' लोपाणउँ ॥२॥

**अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातं ।**
**एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥३॥**

हिमं तुषारं यस्य पर्वतस्य सौभाग्यविलोपि न जातम् । रामणीय-कविच्छेदकारि न सम्पन्नम् ।

हिमु जेह पर्वत किहइ सौभाग्य-विलोपीउँ न हूउँ । रामणीयक-विच्छेद-कारि न संपन हउँ ॥

किंविशिष्टस्य यस्य । अनन्तरत्नप्रभवस्य । अनन्तानि च तानि रत्नानि अनन्तरत्नानि । अनन्तरत्नानां प्रभवः अनन्तरत्नप्रभवस्तस्य अनं० ।

अनंत असंख्यात अछइ जि रत्न तीहँ तणउ प्रभवु उत्पत्ति-हेतु जु।

''जातौ जातौ यदुत्कृष्टं तद्ररत्नमभिधीयते'' । हि यस्मात्कारणात् । एको दोषः गुणसन्निपाते गुणसमूहे निमज्जति ब्रुडति विलयं याति । क इव। अङ्क इव लाञ्छनमिव । यथा अङ्को लाञ्छनं इन्दोश्चन्द्रमसः किरणेषु निमज्जति ब्रुडति ।

यम अंकु लांछनु इंदु चंद्रमा-तणे किरणि बूडइ ।

नूनं न दृष्टं कविनाप्यनेन 'दारिद्र्यमेकं गुणराशिहारि ।

एकुत्र द्वितीय (दारिद्र?) गुण तणउ राशि हरइं ।

हि यस्मात् कारणात् एको दोषः गुणसन्निपाते गुणसमूहे निमज्जति ब्रुडति । यः कवि इति बभाण ।

यीएं कवि इसउं भणिउं । एकु दोषु गुण-संनिपाति बूडइ । दोषु एकु, गुण घणा । घणे गुणि दोषु अछतउं न जाणीयै ॥३॥

**यश्चाप्सरोविभ्रममण्डनानां सम्पादयित्रीं शिखरैर्बिभर्ति ।**
**बलाहकच्छेदविभक्तरागामकालसन्ध्यामिव धातुमत्तां ॥**

यः पर्वतो हिमाचलः शिखरैः शृ[२क]ङ्गैर्धातुमत्तां बिभर्ति । सिन्दूरादीन् धातून् धारयति । धातवोऽत्र सिन्दूरादयो रक्तास्ते विद्यन्ते यस्य असौ धातुमान्। तद्भावो धातुमत्ता । तां धातुमत्तां ।

जु पर्वतु शिखरि श्रृंगि करीउ धातुमत्ता धरइ । सिंदूरादिक धातु धरइ।

[किंविशिष्टां धातुमत्तां ।] सम्पादयित्रीं उत्पादयित्रीं ।

संपजावणहारि ऊपजावणहारि ज धातुमत्ता ।

केषाम् । अप्सरोविभ्रममण्डनानाम् । अप्सरसां देवाङ्गनानां विभ्रमा विलासास्तदर्थं मण्डनानि भूषणानि अप्सरोविभ्रममण्डनानि । तेषां अप्सरोविभ्रम-मण्डनानाम् ।

अप्सरा भणीयइ देवांगना । तीहं तणा जि विभ्रम विलास तदर्थु मंडन ज धातुमत्ता ।

पुनः किंविशिष्टां धातुमत्ताम् । बलाहकच्छेदविभक्तरागाम् । बलाहका मेघास्तेषां छेदाः खण्डानि तेषु विभक्तोऽर्पितो रागो लौहित्यं यया सा बलाहकच्छेद विभक्तरागा । तां बलाहकच्छेदविभक्तरागां मेघखण्डन्यस्तलौहित्याम् ।

बलाहक भणीयइ मेघ । तीह तणा जि छेद खंड तेहि विभक्तु अर्पितु रागु लौहित्यु अछइ ।

उत्प्रेक्षते । अकालसन्ध्यामिव असमयसन्ध्यामिव ।

जाणीयइ किरि अकालि अप्रस्तावि संध्या अछइ ।

सन्ध्यावेलायां किल लोहिता मेघा भवन्ति । मध्याह्नेऽपि रक्त-जलदावलोकनादित्थमूह(हः) ।

किरि तोयि संध्या-वेलां आरक्तमेघ हउइं । मध्याह्निइ । राता मेघ देखीउ देवांगना इसु ऊहु करइ । ज । सिंध्या हु । ए मंडन करउ ।

अकालग्रहणेन सदैव मेघानां रागार्पणं प्रतीयते । एषा उत्प्रेक्षा न उपमा। सत् किलोपमानं दीयते । न च अकाले क्वचित् सन्ध्या संभवति । उत्प्रेक्षायामुप्रमा(?)क्षमेव तथावभासो हेतुः ॥४॥

**आमेखलं संचरतां घनानां छायामधःसानुगतां निषेव्य ।**
**उद्वेजिता वृष्टिभिराश्रियन्ते शृङ्गाणि यस्यातपवन्ति सिद्धाः ॥५॥**

सिद्धा देवविशेषा यस्य पर्वतस्य शृङ्गाणि शिखराणि आश्रि(श्रन)यन्ते आसेवन्ते ।

सिद्ध किसा कहीयइ ।

'अवाप्ताष्ट — — र्यः सिद्धः सद्भिरुदाहृतः' । किं कृत्वा । आमेखलं नितम्ब-पर्यन्ते संचरतां पर्यटतां जीमूतानां मेघानां अधःसानुगतां उपत्यकापतितां छायां निषेव्य सेवित्वा ।

आमेखलु नितम्ब-पर्यंते सांचरता अछइँ जि जीमूत मेघ तींह तणी अध हेठलि सानु शिखरि गत स्थित छाया सेवीउ ।

कथंभूताः सिद्धा वृष्टिभिः उद्वेजिताः पीडिताः सन्तः शीतनिवृत्तये शृङ्गाणि रषिकां ।

—x—